M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 682

Title Saptapadarthi Vaisheshikaprakarana

682

सप्तपदार्थी — वैशेषिक प्रकरण

	Saptapadarthi - Vaisheshika	Title
		Author
		Editor
	Sam. 1749	Year. Vols.
		Publisher
682	Prakarana	Remarks

श्रीशिवात्मजाय नमः॥ हेतवे जगतामेव संसारार्णवसेतवे॥ प्रभवे सर्वविद्यानां शं
भवे गुरवे नमः॥१॥ प्रमितिविषयाः पदार्थाः ते च द्रव्यगुणकर्मसामान्यविशेषसम
वायाभावाख्याः सप्तैव। तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि न
वैव॥ गुणास्तु रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व
बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशति
रेव। कर्माण्युत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचैव। सामान्यं त्रिविधं।
॥१॥ परमपरं परापरं चेति। विशेषास्तु यावन्नित्यद्रव्यवृत्तित्वादनंता एव। समवायस्त्वे
कः एव। अभावस्तु प्रागभावप्रध्वंसाभावात्यंताभावान्योन्याभावलक्षणश्चतुर्विधः। पृथि
वी नित्याऽनित्या च। परमाणुरूपा नित्या कार्यरूपाऽनित्या। सापि शरीरेंद्रियविषय ॥१॥

त० सं २

रूपा। शरीरमस्मदादीनां प्रसिद्धं। इंद्रियं गंधव्यंजकं। विषयो घटादिः। आपोपि प
रमाणुलक्षणाः कार्यलक्षणाश्च। परमाणुरूपा नित्याः कार्यरूपा अनित्याः। ता अपि श
रीरेंद्रियविषयरूपाः। शरीरं वरुणलोके। इंद्रियं रसव्यंजकं। विषयाः सरित्समुद्राः।
तेजोपि नित्यमनित्यं च। परमाणुरूपं नित्यं कार्यरूपमनित्यं। तदपि शरीरेंद्रियवि
षयरूपं। शरीरमादित्यलोके। इंद्रियं रूपव्यंजकं। विषयो भौमदिव्यौदर्याकरजरूपः।
वायुरपि नित्योऽनित्यश्च। परमाणुरूपो नित्यः। कार्यरूपोऽनित्यः। सोपि शरीरेंद्रि
यविषयरूपप्राणलक्षणः। शरीरं वायुलोके। इंद्रियं स्पर्शव्यंजकं। विषयो वृक्षादिकं
पजनकः। प्राणः शरीराभ्यंतरसंचारी। स एव क्रियाभेदात् प्राणापानादिसंज्ञां लभते। स्ति
मितवायुस्तु परमाणुसमूहरूपो वा नारब्धद्रव्यः। आकाशस्तु घटाकाशादिभेद

भिन्नोऽनंत एव। कालस्तु सन्निस्थितिविनाशलक्षणस्त्रिविधः। दिगैंद्र्याग्नेयी याम्या नैर्ऋ
ती वारुणी वायवी कौबेरी ईशानी नागी ब्राह्मी रौद्री चेत्येकादशविधा। आकाशादि
त्रयं वस्तुतस्त्वेकैकमेवोपाधिभेदान्नानाभूतं। आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विवि
धः। परमात्मा त्वीश्वर एक एव। क्षेत्रज्ञा अस्मदादयोऽनंता एव। मनस्तु प्रत्यात्मनि
यतत्वादनंतं। आकाशादिपंचकं नित्यमेवापरं नित्यानित्यं। रूपं सितलोहितपीत
सस्यहरितकपिलचित्रभेदात्सप्तविधं। रसोपि मधुरतिक्तकटुकषायाम्ललवण
॥२॥ चित्रभेदात्सप्तविध एव। गंधोपि द्विविधः सुरभिरसुरभिश्च। स्पर्शः शीतोष्णानु
ष्णाशीतभेदात्त्रिविधः। संख्या एकत्वद्वित्वबहुत्वभेदात्त्रिविधा। परिमाणमणुमहत् ॥२॥
दीर्घह्रस्वं चेति चतुर्विधं। पृथक्त्वमेकानेकवृत्तितः। संयोगो द्विविधः। कर्मजः संयोग

जश्च। विभागो द्विविधः। कर्मजो विभागजश्च। परत्वं कालकृतं दिक्कृतं चेति। अप
रत्वमपि कालकृतं दिक्कृतं चेति। बुद्धिरपि द्विविधा स्मृतिरनुभवश्च। अनुभ
वोपि प्रमा अप्रमा च। अप्रमापि संशयो विपर्ययश्च। प्रमा प्रत्यक्षमनुमितिश्च।
प्रत्यक्षं सप्तप्रकारं। अनुमितिरपि त्रिविधा लिंगस्य त्रैविध्यात्। केवलान्वयि केव
लव्यतिरेक्यन्वयव्यतिरेकी चेति। तदपि स्वार्थं परार्थं चेति। परार्थांगानि प्रति
ज्ञाहेतूदाहरणोपनयनिगमनानि। उभयांगानि पक्षधर्मत्वं सपक्षे सत्त्वं वि
पक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति। तदाभासाः। असिद्धवि
रुद्धानैकांतिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाः। तर्कस्वप्नौ संश
यविपर्ययावेवानिर्विकल्पकसविकल्पकयोस्तु प्रमायामप्रमायां वांतर्भावः॥

सप्तप प्र ३

एवं प्रत्यभिज्ञाहानोपादानोपेक्षाज्ञानानामपि । सुखमनध्यवसाययोस्तु संशय एव वा । सुखं
तु सांसारिकं स्वर्गश्च । दुःखमपि दुःखकारणमात्रसंभवं । इछापि साध्यविषया सा
धनविषया चा । द्वेषोपि साध्यविषयः साधनविषयश्च । प्रयत्नोपि विहितनिषि
द्धोदासीनविषयरूपः । गुरुत्वं समाहाररूपमेकावयविनिष्ठं च । द्रवत्वं सांसिद्धिक
नैमित्तिकं चेति । स्नेहः स्वाभाविक औपाधिकश्च । संस्कारो वेगो भावना स्थितिस्थाप
कश्च । धर्मः प्रवर्त्तको निवर्त्तकश्च । अधर्मस्तु दुःखफलावसानो नमस्कारादिना
॥३॥ श्यः । धर्मस्तु सुखफलावसानः कीर्त्तनादिनाश्यश्च । शब्दो वर्णात्मको ध्वन्यात्मकश्च ।
अत्र गंधसंयोगविभागपरत्वापरत्वसुखदुःखद्वेषसंस्कारधर्माधर्मशब्दा अने ॥३॥
केरूपाः । अन्ये नित्यानित्यरूपाः । संयोगविभागसुखदुःखद्वेषसंस्कारधर्मा

धर्मशब्दा अव्यापकाः । बुद्धीछाप्रयत्ना उभयरूपाः । अन्ये रूपादयः स्वाश्रयव्यापकाः ।
उत्क्षेपणादयो विहितनिषिद्धोदासीनविषयरूपाः । सामान्यं जातिरूपमुपाधिरूपं च ।
परं सत्ता । अपरं घटत्वादि । परापरं द्रव्यत्वगुणत्वकर्मत्वादि । उपाधिरूपं पाचकत्वं
प्रागभावादयः प्रतियोगिभेदादनंता एव । मध्यत्वं परत्वापरत्वाभावः । अंधकारोपि अ
भावः । शक्तिस्तु द्रव्यत्वादिस्वरूपमेव । विशिष्टं विशेषणविशेष्यसंबंध एव । ज्ञातता
ज्ञानसंबंध एव । सादृश्यमुपाधिरूपं सामान्यं । लघुत्वं गुरुत्वाभावः । एवमन्यस्या
पि पदार्थस्य सतोत्रैवांतर्भावः । यथासंख्याया एवं ज्ञेयो । एतेषु मध्ये नित्यानां कार
णत्वमेव । अनित्यानां कारणत्वं कार्यत्वं च । तच्च कारणं समवायिकारणमसमवा
यिकारणं निमित्तकारणं चेति त्रिविधं । अपरे भेदाः स्वयमूहनीयाः । एतेषा

सप्त० प्र०

तत्त्वज्ञानान्निःश्रेयसहेतुः। तत्त्वमनारोपितंरूपं। तस्यज्ञानमनुभवः। सम्यक्श्रवणमनननिदिध्यासन
साक्षात्कारलक्षणलक्षणश्चतुर्विधः। निःश्रेयसंपुनस्तत्त्वज्ञानोत्पाद्यमिथ्याज्ञानकार
णप्रध्वंससमानाधिकरणतत्कार्यसमस्तदुःखाभावः। दुःखंतुशरीरंषडिंद्रियाणि
षड्विषयाःषड्बुद्धयःसुखंदुःखंचेत्येकविंशतिप्रकारं। सुखंदुःखानुषंगित्वाद्दुःखमेव। इष्ट
नीलक्षणधीनत्वात्तत्त्वज्ञानस्यलक्षणमेवोच्यते। तत्रकेवलव्यतिरेकिहेतुर्विशेषोपलक्षणं।
प्रयोगस्तल्लक्षणमितरेभ्योभिद्यतेकेवलव्यतिरेकिहेतुविशेषवचनवत्त्वात्। यदितरेभ्यो
नभिद्यतेतत्केवलव्यतिरेकिहेतुविशेषवचनंनभवति। यथाधूमवत्त्वाजचतघे
॥४॥ केवलव्यतिरेकिहेतुविशेषवचनंनभवति। तस्मादितरेभ्योनभिद्यतइतिनकिंचिभि ॥४॥
द्यतएवेति। एवंसर्वत्रलक्षणप्रयोगोऽूह्यः। तत्रपदार्थसामान्यलक्षणंज्ञातमेव।

द्वि२

द्रव्यंतुद्रव्यत्वसामान्ययोगिगुणवत्तुसमवायिकारणंचेति। गुणस्तुगुणत्वजा
तियोगी। जातिमत्त्वेसतिअचलनात्मकत्वेसतिसमवायिकारणत्वरहितोगुणः।
कर्मकर्मत्वजातियोगि। अघसंयोगविभागासमवायिकारणंचेति। सामान्यंनि
त्यमेकमनेकसमवेतं। विशेषस्तुसामान्यरहितएकव्यक्तिवृत्तिः। नित्यसंबंधः
४ सप्त समवायः। प्रतियोगिज्ञानाधीनज्ञानोऽभावः। पृथ्वीत्वसामान्यवतीगंधवतीच
पृथिवी। अप्त्वजातिमत्यःशीतस्पर्शाआपः। तेजस्त्वजातियोग्युष्णस्पर्शंतेजः।
वायुत्वजातियोग्यरूपःस्पर्शवान्वायुः। शब्दगुणमाकाशं। आदित्यपरिवर्त्तनो
त्पघपरत्वापरत्वासमवायिकारणधारः। परत्वापरत्वानधिकरणंदिक्। आ
त्मत्वसामान्यवान्बुद्धिगुणआत्मा। मनस्त्वजातियोगिस्पर्शशून्यंक्रिया

आदित्यसं यो... त्पाद्यपर त्वापरत्वा समवायि कारण धारपर ...परत्वा

सप्त घं॰ प्रक्र॰

धिकरणं मनः। रूपत्वजातिमच्चक्षुर्मात्रग्राह्यो गुणो रूपं। रसत्वजातियोगी रसनग्रा
ह्यो गुणो रसः। गंधत्वजातियोगी घ्राणग्राह्यो गुणो गंधः। स्पर्शत्वजातियोगी स्पर्श
नमात्रग्राह्यो गुणः स्पर्शः। संख्यात्वसामान्यवती गणनासाधारणं कारणं संख्या।
परिमाणत्वजातियोगी मानव्यवहारासाधारणं कारणं परिमाणं। पृथक्त्वजाति
योगि पृथक्त्वव्यवहारासाधारणं कारणं पृथक्त्वं। संयोगत्वसामान्यवाननित्यः।
संबंधः संयोगः। विभागत्वसामान्यवान् विभक्तप्रत्ययासाधारणं कारणं विभागः।
परत्वसामान्ययोगि परव्यवहारासाधारणं कारणं परत्वं। अपरत्वसामा
॥५॥ न्ययोगि अपरव्यवहारासाधारणं कारणं अपरत्वं। बुद्धित्वसामान्यवती
आत्माश्रयः प्रकाशो बुद्धिः। सुखत्वसामान्यवन्निरुपाध्यनुकूलं वेद्यं सुखं॥ ॥५॥

दुःखत्वसामान्यवन्निरुपाधिप्रतिकूलवेद्यं दुःखं। इच्छात्वसामान्यवती अर्थित्वलक्षणेइ
च्छा। द्वेषत्वजातिमान् प्रज्वलनात्मको द्वेषः। प्रयत्नत्वसामान्यवान् प्रयत्नव्यवहारासा
धारणं कारणं प्रयत्नः। गुरुत्वजातिमदेकवृत्ति पतनासमवायिकारणं गुरुत्वं। द्रवत्व
जातिमदेकव्यक्तिवृत्तिस्पंदनासमवायिकारणं द्रवत्वं। स्नेहत्वसामान्यवान् द्रवत्वे
ऽन्यसंग्रहासाधारणं कारणं स्नेहः। संस्कारत्वजातिमान् स्वोत्पत्तावृस्वापादको
गुणः संस्कारः। धर्मत्वसामान्यवान् सुखासाधारणं कारणं धर्मः। अधर्मत्वसामान्यवा
न् दुःखासाधारणं कारणं अधर्मः। शब्दत्वजातियोगी श्रोत्रग्राह्यो गुणः शब्दः। ह॥
उत्क्षेपणत्वजातिमदूर्ध्वप्रदेशसंयोगासमवायिकारणं कर्मोत्क्षेपणं। अपक्षेपण
त्वजातिमदधोदेशसंयोगकारणं कर्मापक्षेपणं। आकुंचनत्वजातिमदृ अ

तप्र ० त्वापादकं कर्म॥ आकुंचनं प्रसारणत्वजातिमत् ऋजुत्वापादकं कर्म प्रसारणं। प्रकरण०
न०२ गमनत्वजातिमत् अनियतदेशसंयोगासमवायिकारणं कर्म गमनं। व्यापकमा
त्रं सामान्यं परं। व्याप्यमात्रं सामान्यमपरं। व्याप्यव्यापकरूपं सामान्यं परा
परं। अनादिः सांतः प्रागभावः। सादिरनंतः प्रध्वंसाभावः। अनादिरनंतः सं
सर्गाभावोऽत्यंताभावः। तादात्म्यनिषेधोऽन्योन्याभावः। नित्यत्वं प्रध्वंसाविर
हः। अनित्यत्वं प्रध्वंसवत्त्वं। निरवयवः क्रियावान् परमाणुः। द्रव्यसमवायि
कारणमवयवः। द्व्यणुकारंभकं कार्यद्रव्यमवयवि। प्राग्भाववत्कार्यं। भो व३
॥६॥ गायतनं मनोऽवयविशरीरं। स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो ॥६॥
भोगः। यदवच्छिन्नात्मनि भोगस्तदायतनं। साक्षात्कारिज्ञानकारणमिंद्रियं।

शरीरेंद्रियव्यतिरिक्तं आत्ममनोभोगकारणं विषयः। पार्थिवमात्रेंधनं तेजो भौमं॥
जलमात्रेंधनं तेजो दिव्यं। पार्थिवजलेंधनं तेज औदर्यं। निरिंधनं तेज आकरजं तं
वं सुवर्णादि। सकृत्कारणयौगपद्यमुत्पत्तिः। अनेकेषामेकक्षणे संबंधो यौग
पद्यं। विभागानुत्पादकविभागप्रागभावसंबद्धकर्मावच्छिन्नः कालः क्षणः। तन्मात्रा
वस्थायित्वं क्षणिकं। स्थितिर्वर्तमानत्वं। तच्च प्राक्संबंधस्वाभावरहितस्वरूपवत्त्वं।
स्वकार्यप्रागभावसंबद्धत्वं वा। विनाशः प्रध्वंसः। शरीरसंबंधे नष्टज्ञानवत्त्वं हे
तुत्वं। प्रत्यात्मसमवेतधर्माधर्मोपगृहीतत्वं प्रत्यात्मनिष्ठत्वं। शीताद्यानां स्पर्शा
नां शीतत्वादिकं लक्षणं॥ मधुराद्यानां रसानां मधुरत्वादिकं। गंधयोः सुरभि
त्वासुरभित्वे। शीताद्यानां शीतत्वादिकं। एकत्वादिनामेकत्वादिकं। अणुत्वादीना

संस्त्रप०

मणुत्वादिकं कर्मासमवायिकारणं संयोगः कर्मजः । संयोगासमवायिकारणं संयो- प्रक०ण

गः संयोगजः । कर्मासमवायिकारणो विभागः कर्मजः विभागासमवायिकारणं

विभागो विभागजः ॥ आदित्यपरिवर्त्तनोत्पाद्यं परत्वापरत्वं कालकृतं ॥ आदित्य-

कृ संयोगानुत्पाद्यं परत्वापरत्वं दिक्कृतं ॥ भावनासाधारणं कारणं ज्ञानं स्मृतिः स्मृति- ॥=प्र ५

रूपं ज्ञानमनुभवः तत्त्वानुभवः प्रमा ॥ अतत्त्वज्ञानमप्रमा ॥ अनवधारणं ज्ञानं सं-

शयः ॥ अवधारणरूपातत्त्वज्ञानं विपर्ययः ॥ अज्ञायमानकरणजन्यस्तत्त्वानुभवः

प्रत्यक्षप्रमा ॥ ज्ञायमानकरणजन्यस्तत्त्वानुभवोऽनुमितिप्रमा ॥ प्रमायोगव्यवच्छि-

॥७॥ न्नं प्रमाणं ॥ प्रत्यक्षप्रमायोगव्यवच्छिन्नं प्रत्यक्षप्रमाणं ॥ तच्चेश्वरघ्राणरसनचक्षु- ॥७॥

स्त्वक्श्रोत्रमनोऽन्तःकरणं ॥ अनुमितिप्रमायोगव्यवच्छिन्नमनुमानं तच्च व्याप्तिप-

क्षधर्मताविशिष्टलिंगज्ञानं ॥ व्याप्तिश्च व्यापक स्य व्याप्याधिकरणोपाध्यभा-

वविशिष्टसंबंधः ॥ पक्षधर्मता च व्याप्यस्य पक्षसंबंधः ॥ व्यापकं साध्यं व्याप्यं लिंगं ॥ उपा- म॰२

धिश्च साधनाव्यापकत्वे सति साध्यसमव्याप्तिः ॥ पक्षव्यापकोऽपि सपक्षस्पर्शी विपक्षे-

न्योऽबाधितविषयोऽसत्प्रतिपक्षः केवलान्वयी ॥ पक्षव्यापकः सपक्षशून्यो विपक्षव्या-

वृत्तोऽबाधितविषयोऽसत्प्रतिपक्षः केवलव्यतिरेकी ॥ पक्षव्यापकः सपक्षस्पर्शी विपक्षा-

द्व्यावृत्तोऽबाधितविषयोऽसत्प्रतिपक्षोऽन्वयव्यतिरेकी ॥ संदिग्धसाध्यत्वेनोपात्तत्वं

पक्षत्वं निश्चितसाध्याधिकरणत्वं सपक्षत्वं निश्चितसाध्यानधिकरणत्वं विपक्ष-

त्वं ॥ स्वार्थत्वमशब्दरूपत्वं ॥ परार्थत्वं शब्दरूपत्वं ॥ शब्दस्याप्यनुमानविषयत्वेनाविनाभावो

पजीवकत्वेन वानुमानत्वं ॥ तत्र साध्य[illegible] पक्षवचनं प्रतिज्ञा ॥ लिंगस्य पक्षध-

र्मत्ववचनं हेतुः ॥ दृष्टांतवचनमुदाहरणं ॥ परामर्शत्ववचनमुपनयः ॥ लिंगसंबंधप्र- बं॰२

युक्तं निश्चितसाध्यवचनं निगमनं ॥ अगवैकस्य प्रमाभासत्वं ॥ लिंगत्वेनानिश्चितत्वं

मसिद्धत्वं। पक्षविपक्षमात्रस्पर्शित्वं विरुद्धत्वं। पक्षत्रयवृत्तित्वमनैकान्तिकत्वं। साध्य
साधकत्वे सति पक्षमात्रस्पर्शित्वमनध्यवसितत्वं। साध्यतद्भावसाध्यत्वं सदि
ग्धत्वं। उपजीव्यप्रमाणनिश्चितसाध्यविपरीतत्वं कालात्ययापदिष्टत्वं। साध्य
विपरीतसाधकहेतुत्वं तत्त्वकरणसमः। अनिष्टव्यापकप्रसञ्जनं तर्कः। नुप
त्वेनाभावयोः प्रतिसिन्नवचनं प्रसञ्जनं निग्रहः। अन्तःकरणजन्यज्ञानं स्व

प्नः। योगजधर्मानुगृहीतस्य मनसो निरिन्द्रियप्रदेशावस्थानं निद्रा। वस्तु
स्वरूपमात्रावभासकं निर्विकल्पकं। विशिष्टस्य ग्रहणं सविकल्पकं। अ
तीतावस्थावच्छिन्नवस्तुग्रहणं प्रत्यभिज्ञानं। दुःखसाधनं ज्ञानं हानं। सु
खसाधनं ज्ञानमुपादानं। उभयासाधनं ज्ञानमुपेक्षा। अनादि

नितोभयकोऽयमनवधारणज्ञानमनध्यवसायः। प्रयत्नोत्पाद्यसाधनाधीनं सु
खं सांसारिकं। इच्छामात्राधीनसाधनसाध्यं सुखं स्वर्गः। सांसिद्धिकत्वं तेजःसं
योगानुत्पाद्यत्वं। तेजःसंयोगोत्पाद्यत्वं नैमित्तिकत्वं। कर्मजः संस्कारो वेगः। ज्ञा
नजः संस्कारो भावना। संकुचितापादकः संस्कारः स्थितस्थापकः। अव्यापकत्वं
स्वाभावसादेश्यं। तदभावो व्यापकत्वं। विहितत्वं धर्मोत्पादकत्वं। अधर्मोत्पादक
त्वं निषिद्धत्वं। उभयविपरीतत्वमुदासीनत्वं। निर्बाधकं सामान्यं जातिः। सबाध
कं सामान्यमुपाधिः। आरोपितनीलरूपो भावोंधकारः। ज्ञानसंबन्धो ज्ञानवि
षयत्वं। तत्त्वज्ञानेन नियमेनावच्छेद्यत्वं प्रमेयत्वं। गुणादिषु संख्याव्यवहा
रः संख्याप्रत्यासत्तिनिबन्धनः। एतदेव सत्तादिषु सत्ताप्रत्यासत्तिनिबंधनत्वं॥

कार्योत्पादकत्वं कारणत्वं। स्वसमवेतकार्योत्पादकत्वं समवायिकारणत्वं। समवायि
कारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणं। उभयविपरीतं का
रणं निमित्तकारणं। इयत्तावच्छिन्नपरिमाणयोगि मूर्त्तत्वं। तदभावोऽमूर्त्त
त्वं। कार्यायोगव्यवच्छिन्नसामग्रीसान्निध्यमात्रेण पदार्थाभिधानमुद्देशः। रू
परसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरु
त्वद्रवत्वसंस्काराः पृथिवीसमवेताः। रूपरसस्पर्शसंख्यापरिमाणपृथक्त्व
संयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्काराः अप्समवेताः। रू
पस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारा
स्तेजःसमवेताः। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोग विभागपरत्वापर

त्वसंस्काराः वायुसमवेताः। संख्यापरिमाणपृथक्त्वसंयोगविभागशब्दाः आ
काशसमवेताः। संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालदिक्सम
वेताः। संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छा
द्वेषप्रयत्नधर्माधर्मभावनाः आत्मसमवेताः। संख्यापरिमाणपृथ
क्त्वसंयोगविभागपरत्वापरत्वसंस्काराः मनःसमवेताः। कर्ममूर्त्त
द्रव्यसमवेतमनित्यमेव। सामान्यं द्रव्यगुणकर्मसमवेतं। विशेष
स्तु नित्यद्रव्यसमवेतः समवायाभावावसमवेतौ। द्रव्यं तु कार्यरू
पं स्वावयवसमवेतं। अकार्यद्रव्यमसमवेतमेव। विनाशस्तु द्रव्ये

स॰सप्त॰ स्यसमवाय्यसमवायिकारणनाशाभ्यां गुणस्यसमवाय्यसमवायिनिमि पत्र॰
त्तकारणनाशविरोधिगुणेभ्यां विनाशः कर्मणः समवाय्यसमवा
यिकारणविनाशोत्तरसंयोगाभ्यां प्रागभावस्य प्रतियोग्युत्पादक
सामग्रीतः अन्योन्याभावस्य प्रतियोगिविनाशकारणं तु उत्पत्ति
स्तु द्रव्यगुणकर्मणां समवायिनिमित्तकारणेभ्यः तत्र समवायि
कारणं द्रव्याणां द्रव्यमेव असमवायिकारणं द्रव्यकर्मणोः सं
॥१०॥ योग एव गुणस्य त्वसमवायिकारणं क्वचित्समानजातीयं
क्वचित् असमानजातीयं गुणान्तरं क्वचित्कर्म निमित्तकारणं ॥१०॥

सर्वेषामीश्वरादृष्टादि अन्योन्याभावप्रध्वंसाभावयोस्तु निमित्तादेव के
वलादुत्पत्तिः अपरसकलशास्त्रसुबोधमितिवैशिष्ट्यमन्यव्यावृत्तिः॥
समानाधिकरणव्यावर्त्तकं विशेषणं एकविभक्त्यन्तपदवाच्यत्वं समा
नाधिकरणत्वं व्यधिकरणमवच्छेदकमुपलक्षणं भिन्नविभक्त्य
न्तपदवाच्यत्वसोकार्यनिष्ठत्वं वैयधिकरण्यं जातिप्रत्यासत्ति
रधिकरणत्वं समस्तमूर्त्तसंयोगित्वं विभुत्वं विद्यमानयोः संबं
धो ऽयुतसिद्धिः अविद्यमानयोराधाराधेययोः संबंधो युतसि
द्धिः सैव साधनाभिज्ञानानां मुकं शास्त्रमिति सप्तपदार्थसंख्यावे

स॰सप॰ नैव॰

॥११॥ घावत्समस्तपरापराः॥ तावत्सप्तपदार्थी यमस्तु वस्तुप्रकाशिनी॥ अन्य
त्रक्लृप्तनियतपूर्ववृत्तिन एव कार्यसंभवे तद्भिन्ने त्वमन्यथासि
द्धत्वं॥ अन्यं प्रतिपूर्ववृत्तित्वे गृहीत एव यस्यान्यं प्रतिपूर्ववृत्ति
ता गृह्यते॥ यथा घटादिकं प्रति आकाशस्य। यं पुरस्कृत्य यस्य पू
र्ववृत्तिता गृह्यते तत्तेनान्यथासिद्धं॥ यथा तन्तुं पुरस्कृत्य तन्तुरूपं
प्रथमाद्य एव यस्य पूर्ववृत्तिता गृह्यते तत्तेनान्यथासिद्धं। यथा
द्वितीयमाद्य एव द्रव्यस्य। जनकं प्रति पूर्ववृत्तित्वे गृहीत एव यत्र ॥११॥

प॰स॰प॰ प्र॰

॥१२॥ अन्यं प्रति पूर्ववृत्तित्वग्रहस्तदन्यथासिद्धः यथा कुलालपितृत्वेन॥
इमं न्यथासिद्धयः समाप्ताः॥ श्रीरस्तु॥ संवत् १७५० वर्षे शाके १६१५ प्र
वर्त्तमाने॥ परीमंगल...रे वैशाखमासे बहुपक्षे तापीतीरे व्याव
लिखितेन नागरज्ञातीय रामचंद्रसुतेन विठलेन प्रकरणं
वैशेषिकाख्यप्रकरणं पुस्तकं लिखितं॥ श्रीरस्तु॥ ॥
श्रीरस्तु कल्याणमस्तु॥ श्रीः श्रीः श्रीः श्रीः॥ ॥श्री छ॥ ॥१२॥

श।
२८